**PAPER - 3**

# MT

**2018 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - III**

**Time : 2 Hours** **(Pages 7)** **Marks : 40**

**प्रथमः विभागः - गद्यम् ।**

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

वरदा ............ विषयस्य प्रकल्पं कर्तुम् इच्छति । (समाजशास्त्रस्य / अन्तर्जालस्य)

(ii) कः कं वदति ? १

अद्य प्रभाते त्वत्तः सन्देशः प्राप्तः ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

वरदायाः सखी ग्रन्थालयात् प्राप्तं संज्ञापनं प्रेषयति ।

प्रति - varada@sanskrit.com
विषयः - सप्ताश्चर्याणि ।
सखि वरदे, शुभप्रभातम् ।
अद्य प्रभाते त्वत्तः सन्देशः प्राप्तः।
समाजशास्त्रविषयस्य प्रकल्पार्थं सप्ताश्चर्यविषये ज्ञातुमिच्छसि इति मन्ये । तदर्थम् अन्तर्जालात् प्राप्तमिदं संज्ञापनं प्रेषयामि। विश्वे तथा सर्वधर्मेषु सप्ताङ्कः विशेषतामादधाति । अङ्कः एष भाग्यदर्शकः स्वामित्वद्योतकः च। यथा सप्तस्वराः सप्तदिनानि तथैव सप्ताश्चर्याणि जगति विशेषरूपेण ख्यातानि । सप्तशून्यशून्यद्वितमे ख्रिस्ताब्दे (2007) नूतनानि विश्वसप्ताश्चर्याणि उद्घोषितानि यानि शताधिककोटिरसिकजनैः विश्वतः निर्वाचितानि। प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम् - फेव्हिन - अम्फीथिएटरम् एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राट्-व्हेस्पॅशियनमहोदयेन निर्मितम् । द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः । उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउन-टी-नृपेण निर्मितैषा । त्वं जानास्येव । यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः । एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा ।

**२. स्वमतप्रकटनम् ।** २

पत्रप्रेषणाद् अन्तर्जालपत्रम् एव सन्देशप्रेषणस्य प्रभावशालि साधनं विद्यते इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्याय चित्वा वाक्यं पुनर्लिखत । १

१) यदि ग्राहकः ग्राहकमञ्चमभिगच्छति तर्हि शाकविक्रेता .......... वञ्चितः भवति ।
(परिमाणात् / अनुज्ञापत्रात्)

२) पर्यावरणरक्षणार्थं .......... स्यूतानाम् उपयोगः न करणीयः । (प्लास्टिक / वस्त्र)

(ii) पूर्णवाक्येन उत्तरं लिखत । १
ग्राहकाणां कः अधिकारः ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
ग्राहकहिताय ग्राहकसुखाय ग्राहकमञ्चः स्थापितः ।

| | | |
|---|---|---|
| माता | - | मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम्। तुलायाः दण्डोऽपि त्रुटितः। अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम्? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - | कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - | ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (1974) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - | यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय । |
| माता | - | युक्तमुक्तं भवता । |
| प्रथमः शाकविक्रेता | - | (तोलयित्वा ददाति) गृह्णातु भवती । क्षम्यताम् । |
| माता | - | कथं प्लास्टिकस्यूतं ददासि ? वस्त्रस्यूतः मत्समीपे वर्तते । |
| मधुरा | - | पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानामुपयोगः न करणीयः । विधिनापि तेषामुपयोजनं निषिद्धमस्ति । |

**२. स्तम्भपूरणम् ।** २

| वैधाचारः | अवैधाचारः |
|---|---|
| | |

(त्रुटिता तुला, अनुज्ञापत्रम्, प्लास्टिकस्यूतः, ISI परिमाणानि)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) भिन्नार्थकशब्दाः । १

जीवनं नाम जलम्, आयुः ।

a) जीवनं स्वकर्माधिष्ठितम् अस्ति । अस्मिन् वाक्ये जीवनं नाम ...........।

b) अहं तु जीवनदाता अस्मि । अस्मिन् वाक्ये जीवनं नाम ............... ।

(ii) विशेषण - विशेष्य - अन्वितिः । (मेलनं कुरुत ।) १

| | 'अ' | 'ब' |
|---|---|---|
| १) | गङ्गा | प्रशान्तमनाः । |
| २) | सागरः | जीवनदाता । |
| ३) | मेघः | पापक्षालनकर्त्री । |
| ४) | यात्री | जलग्राहकः । |

(iii) गद्यांशात् चित्वा सम्बोधन-विभक्तेः द्वौ शब्दौ लिखत । १

तन्निशम्य गङ्गा उक्तवती, रे यात्रिन् यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि । अनन्तरं तस्य किं भवतीति न जानेऽहमिति । तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति । सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं **गृह्णामीति** सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति। बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति ? मेघः भणितवान्, न किमपि करोमि। अहं तु जीवनदाता । जीवनं स्वकर्माधिष्ठितम् । अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामीति।

**२. पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) नदी सागरे पापजलम् उत्सृजति ।

(ii) मेघः जलं गृहशिखरे वर्षति ।

(iii) मानवाः नद्यां पापं क्षालयन्ति ।

(iv) सागरजलस्यं बाष्पं भवति ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् ।**

मञ्जूषातः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत । २

बुधस्य उद्दिष्टम्

यदि सिद्धिप्रप्तिः → सफलं भवेत् तर्हि ← यदि पित्तशमनम्

-------------  -------------

---------- अप्रस्तुतः  ---------- अप्रस्तुतः

(शर्करया, दण्डः, साम्ना, पटोलः)

ज्ञानतेजसो महान् निधिस्त्वं दयाघनस्त्वं तपोनिधिस्त्वम् ।
अनिशं शिष्यहितस्य चिन्तनं गुरुचरणाभ्यां सदा वन्दनम् ।।१।।

**२. शब्दज्ञानम् ।** १

विशेषणैः जालचित्रं पूरयत ।




**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ।।१।।
पारीनगर्याः खलु कण्ठभागे मालेव सीनाख्यनदी सुलग्ना ।
महासुखं यत्र जना लभन्ते नौकाविहारस्य तटभ्रमैश्च ।।२।।
ततस्तटे सीनसरित्समीपे गॉथीक-स्थापत्यकलात्मरूपम् ।
न्यायस्य प्रासाद इति प्रसिद्धमैतिह्यमुक्तं भवनञ्च दृष्टम् ।।३।।

१. **अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
सीननदीतटे जनाः किं लभन्ते ?

२. **तात्पर्यलेखनम् ।** २
भोजनसमयः कथं किमर्थं च आचरणीयः ?

प्र.२ क) **स्मरणम् ।**
**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २
(i) गुणी ....... मूषकः ॥
(ii) शस्त्रैर्हतास्तु ....... हन्ति ॥

प्र.२ ड) **श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) तस्मान्नरो वह्निविवर्धनाय | स्रजं करकमेव च । |
| (ii) धर्मार्थकाममोक्षाणाम् | कर्मणा मनसा गिरा । |
| (iii) उपानहौ च वासश्च | मुहुर्मुहुर्वारि पिबेदभूरि । |
| (iv) अद्रोहः सर्वभूतेषु | आरोग्यं मूलमुत्तमम् । |
| | धृतमन्यैर्न धारयेत् । |

**तृतीयः विभागः - व्याकरणम् ।**

प्र.३ **यथानिर्दिशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २
अ) **नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | प्रथमा बहुवचन | तृतीया एकवचन | षष्ठी एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(कर्मणा, अस्य, मूर्ध्नः, अपहर्तारः, अनया, ताः)

आ) **क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(भवेत्, गृह्णातु, अगदत्, दास्यामि, जानाति, बभूव)

**इ) समासाः । कोष्ठकपूर्तिं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | समस्तपदम् | विग्रहः | नाम |
|---|---|---|---|
| (i) | अश्वाधिरूढा | अश्वम् अधिरूढा । | ............. । |
| (ii) | अहर्निशम् | ............. । | समाहार द्वन्द्व समास । |
| (iii) | न्यायप्रासादः | ............. । | चतुर्थी तत्पुरुष समास । |
| (iv) | सुमार्गः | शोभनः मार्गः । | ............. । |
| (v) | निर्गुणः | निर्गताः गुणाः यस्मात् सः । | ............. । |
| (vi) | काशीनगरम् | ............. । | कर्मधारय समास । |

**ई) उपपदविभक्तिः ।** २
**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) कश्चन गोन्दिया - निवासी यात्री एकदा .................. जगाम ।
(काशीनगरात् / काशीनगरे / काशीनगरं )

(ii) जनसमाकुलात् .................. दूरं गत्वा सः मनःशान्तिमनुभवितुमैच्छत् ।
(नगरम् / नगरस्य / नगरात् )

(iii) पापाचरणं कृत्वा तस्य भारं न .................. अपि दास्ये । (कस्मात् / कस्य / कस्मै)

(iv) अलं ................ । (कोपं / कोपेन / कोप )

(v) ................ कृते व्यायामः आवश्यकः । (छात्रेभ्यः / छात्राणां / छात्रेषु )

(vi) नेता ................ भोजनं वितरति । (जनैः / जनानां / जनेषु )

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) कूलजश्च = .......... + च ।

(ii) .......... = दीपेन + एकेन ।

(iii) मूर्ध्नोऽस्य = .......... + अस्य ।

(iv) घर्षयेद्दन्तम् = घर्षयेत् + ..........।

(v) .......... = तस्मिन् + एव ।

(vi) श्रीरचला = श्रीः + .......... ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) अस्मिन् मार्गे .......... वाहनानि सन्ति । (4)

(ii) ग्रीष्मः .......... ऋतुः । (2nd)

(iii) .......... स्त्रियौ स्तः । (2)

(iv) भाद्रपदमासस्य .......... तिथौ गणेशोत्सवः प्रारभते । (4th)

(v) दिनस्य .......... अहं दुग्धं पिबामि । (twice)

(vi) अस्मिन् वर्षे अहं .......... विदेशं गतः । (thrice)

**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| मया | पत्रं | पठितम् |
| त्वया | काव्यं | लिखितम् |
| तया | साहसं | प्रेषितम् |
| तेन | भोजनं | कृतम् |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

सुनीता अनीता च माधवदासस्य द्वे कन्ये । सुनीतायाः पतिः मालाकारः तथा अनितायाश्च ............ । एकदा सुनीता पित्रे कथितवती तात, प्रभूतं पर्जन्यः ............ इति मे इच्छा येन अस्माकं वनस्पतयः पर्याप्तं जलं प्राप्स्यन्ति । तच्छ्रुत्वा अनीता अवदत्, न, न, तात, अहं तु चण्डातपं कामये येन अस्माकं मृद्घटाः सुरक्षिताः स्युः । उभयोः कामनाम् ............ माधवदासः तूष्णीं स्थितः। ............ अवदत्, 'अहमत्र किं वदामि ?'

(आकर्ण्य, कुम्भकारः, मनसि, वर्षतु)

**Best of Luck**